श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# श्रीमद्भागवत रसिक कुटुंब

## उद्धव गीता 11.8 प्रथम सोपान



स्वधाम प्रस्थान को देखो हो रहे श्रीकृष्ण तैयार
उद्धृत किये उद्धव समक्ष अद्भुत अनमोल उद्गार

**नारायणं(न्) नमस्कृत्य, नरं(ञ्) चैव नरोत्तमम्।**
**देवीं(म्) सरस्वतीं(वँ) व्यासं(न्), ततो जयमुदीरयेत्**

**नामसङ्कीर्तनं(यँ) यस्य, सर्वपापप्रणाशनम्।**
**प्रणामो दुःखशमनस्, तं(न्) नमामि हरिं(म्) परम्**

**श्रीमद्भागवतमहापुराणम्**
**एकादशः(स्) स्कन्धः**
**अथाष्टमोऽध्यायः**

**ब्राह्मण उवाच**

**सुखमैन्द्रियकं(म्) राजन्, स्वर्गे नरक एव च ।**
**देहिनां(यँ) यद् यथा दुःखं(न्), तस्मान्नेच्छेत तद् बुधः ॥ 1 ॥**

**सुखमैन्+ द्रियकं(म्),तस्मान्+ नेच्छेत**

**ग्रासं(म्) सुमृष्टं(वँ) विरसं(म्), महान्तं(म्) स्तोकमेव वा ।**
**यदृच्छयैवापतितं(ङ्), ग्रसेदाजगरोऽक्रियः ॥ 2 ॥**

**यदृच्+ छयैवा+ पतितं(ङ्),ग्रसेदा+ जगरोऽ+ क्रियः**

**शयीताहानि भूरीणि, निराहारोऽनुपक्रमः ।**
**यदि नोपनमेद् ग्रासो, महाहिरिव दिष्टभुक् ॥ 3॥**

निराहारोऽ+ नुपक्रमः,महा+ हिरिव

ओजः(स्)सहोबलयुतं(म्), बिभ्रद् देहमकर्मकम् ।

शयानो वीतनिद्रश्च, नेहेतेन्द्रियवानपि ॥ 4 ॥

देह+ मकर्मकम् ,नेहेतेन्द्रि+ यवानपि

मुनिः(फ्) प्रसन्नगम्भीरो, दुर्विगाह्यो दुरत्ययः ।

अनन्तपारो ह्यक्षोभ्यः(स्), स्तिमितोद इवार्णवः ॥ 5 ॥

दुर्+ विगाह्यो, स्तिमि+तोद

समृद्धकामो हीनो वा , नारायणपरो मुनिः ।

नोत्सर्पेत न शुष्येत, सरिद्भिरिव सागरः ॥ 6 ॥

समृद्+ धकामो ,सरिद्+ भिरिव

दृष्ट्वा स्त्रियं(न्) देवमायां(न्), तद्भावैरजितेन्द्रियः ।

प्रलोभितः(फ्) पतत्यन्धे, तमस्यग्नौ पतं(ङ्)गवत् ॥ 7 ॥

तद्+ भावै+ रजितेन्द्रियः

योषिद्धिरण्याभरणाम्बरादि-

द्रव्येषु मायारचितेषु मूढः ।

प्रलोभितात्मा ह्युपभोगबुद्ध्या,

पतं(ङ्)गवन्नश्यति नष्टदृष्टिः ॥ 8 ॥

योषिद्+ धिरण्या+ भरणाम्+ बरादि ,माया + रचितेषु

ह्युप+ भोग+ बुद्ध्या , पतं(ङ्)+ गवन् + नश्यति

स्तोकं(म्) स्तोकं(ङ्) ग्रसेद् ग्रासं(न्), देहो वर्तेत यावता ।

गृहानहिं(म्)सन्नातिष्ठेद्, वृत्तिं(म्) माधुकरीं(म्) मुनिः ॥ 9 ॥

गृहा+ नहिं(म्)सन् + नातिष्ठेद्

अणुभ्यश्च महद्भ्यश्च, शास्त्रेभ्यः(ख्) कुशलो नरः ।

सर्वतः(स्) सारमाददद्यात् , पुष्पेभ्य इव षट्पदः ॥ 10 ॥

सारमा + दद्यात्

सायन्तनं(म्) श्वस्तनं(वँ) वा,  न सं(ङ्)गृह्णीत भिक्षितम् ।
पाणिपात्रोदरामत्रो,  मक्षिकेव न सङ्ग्रही ॥ 11॥

श्वस् + तनं(म्),पाणि+ पात्रो+ दरामत्रो

सायन्तनं(म्) श्वस्तनं(वँ) वा , न सं(ङ्)गृह्णीत भिक्षुकः ।
मक्षिका इव सं(ङ्)गृह्णन् , सह तेन विनश्यति ॥ 12॥

सं(ङ्)गृह्+ णीत

पदापि युवतीं(म्) भिक्षुर्- न स्पृशेद् दारवीमपि ।
स्पृशन् करीव बध्येत,  करिण्या अं(ङ्)गसं(ङ्)गतः ॥ 13॥

दा+ रवी+ मपि,अं(ङ्)ग+ सं(ङ्)गतः

नाधिगच्छेत् स्त्रियं(म्) प्राज्ञः(ख्), कर्हिचिन्मृत्युमात्मनः ।
बलाधिकैः(स्) स हन्येत, गजैरन्यैर्गजो यथा ॥ 14 ॥

कर्हिचिन् + मृत्यु+ मात्मनः,गजै+ रन्यैर् + गजो

न देयं(न्) नोपभोग्यं(ञ्) च, लुब्धैर्यद् दुःखसं(ञ्)चितम् ।
भुङ्क्ते तदपि तच्चान्यो, मधुहेवार्थविन्मधु ॥ 15 ॥

नो+ पभोग्यं(ञ्),मधु+ हेवार्थ + विन्मधु

सुदुःखोपार्जितैर्वित्तै- राशासानां(ङ्) गृहाशिषः ।
मधुहेवाग्रतो भुङ्क्ते,  यतिर्वै गृहमेधिनाम् ॥ 16 ॥

सुदुःखो + पार् + जितैर्+ वित्तै,मधुहेवा+ ग्रतो

ग्राम्यगीतं(न्) न शृणुयाद्,  यतिर्वनचरः(ख्) क्वचित् ।
शिक्षेत हरिणाद् बद्धान्- मृगयोर्गीतमोहितात् ॥ 17 ॥

यतिर्+ वनचरः(ख्),मृगयोर्+ गीत+ मोहितात्

नृत्यवादित्रगीतानि, जुषन् ग्राम्याणि योषिताम् ।
आसां(ङ्) क्रीडनको वश्य,  ऋष्यशृं(ङ्)गो मृगीसुतः ॥ 18॥

नृत्य+ वादित्र+ गीतानि, ऋष्य+ शृं(ङ्)गो

जिह्वयातिप्रमाथिन्या, जनो रसविमोहितः ।
मृत्युमृच्छत्यसद्बुद्धिर्- मीनस्तु बडिशैर्यथा ॥ 19॥

जिह्वया+ तिप्रमा+ थिन्या, मृत्यु+ मृच्छत्य+ सद्बुद्धिर् ,बडिशैर् + यथा

इन्द्रियाणि जयन्त्याशु, निराहारा मनीषिण: ।

वर्जयित्वा तु रसनं(न्), तन्निरन्नस्य वर्धते ॥ 20 ॥

जयन् + त्याशु, तन्नि+ रन्नस्य

तावज्जितेन्द्रियो न स्याद्, विजितान्येन्द्रिय:(फ्) पुमान् ।

न जयेद् रसनं(यँ) यावज्-जितं(म्) सर्वं(ञ्) जिते रसे ॥21 ॥

तावज्+ जितेन्द्रियो, विजितान् + येन्द्रिय:(फ्)

पिं(ङ्)गला नाम वेश्याऽऽसीद्, विदेहनगरे पुरा ।

तस्या मे शिक्षितं(ङ्) किं(ञ्)चिन्- निबोध नृपनन्दन ॥ 22 ॥

सा स्वैरिण्येकदा कान्तं(म्), सं(ङ्)केत उपनेष्यती ।

अभूत् काले बहिर्द्वारि, बिभ्रती रूपमुत्तमम् ॥23 ॥

स्वै+ रिण्ये+ कदा, रू+ पमुत्+ तमम्

मार्ग आगच्छतो वीक्ष्य, पुरुषान् पुरुषर्षभ ।

ताञ्छुल्कदान् वित्तवत:(ख्), कान्तान् मेनेऽर्थकामुका ॥ 24 ॥

पुरुषर् + षभ, ताञ्+ छुल्क+ दान्

वित्+ तवत:(ख्), मेनेऽर्थ+ कामुका

आगतेष्वपयातेषु, सा सं(ङ्)केतोपजीविनी ।

अप्यन्यो वित्तवान् कोऽपि, मामुपैष्यति भूरिद: ॥ 25॥

आगतेष्व+ पयातेषु, स(ङ्)के+ तोप+ जीविनी, मामु+ पैष्यति

एवं(न्) दुराशया ध्वस्त- निद्रा द्वार्यवलम्बती ।

निर्गच्छन्ती प्रविशती, निशीथं(म्) समपद्यत ॥ 26 ॥

द्वार्+ यव+ लम्बती, निर् + गच्छन्ती

तस्या वित्ताशया शुष्यद्- वक्त्राया दीनचेतस: ।

निर्वेद:(फ्) परमो जज्ञे, चिन्ताहेतु:(स्) सुखावह: ॥ 27 ॥

वित्+ ताशया

त*स्या निर्विण्णचित्ताया, गीतं(म्) श्रृणु यथा मम ।
निर्वेद आशापाशानां(म्), पुरुष*स्य यथा ह्यसि: ॥ 28॥

निर्विण्ण+ चित्ताया

न ह्यं(ङ्)गाज्जातनिर्वेदो , देहब*न्धं(ञ्) जिहासति ।
यथा वि*ज्ञानरहितो , मनुजो ममतां(न्) नृप ॥ 29॥

ह्यं(ङ्)गाज् + जात+ निर्वेदो, पिं(ङ्)गलोवाच

पिंगलोवाच

अहो मे मोहविततिं(म्), प*श्यताविजितात्मन: ।
या कान्तादसत:(ख्) कामं(ङ्), कामये येन बालिशा ॥ 30 ॥

पश्यता+ विजितात्मन:, कान्ता+ दसत:(ख्)

स*न्तं(म्) समीपे रमणं(म्) रति*प्रदं(वँ),
वित्त*प्रदं(न्) नि*त्यमिमं(वँ) विहाय ।
अकामदं(न्) दुःखभयाधिशोक-
मोह*प्रदं(न्) तु*च्छमहं(म्) भजेऽज्ञा ॥ 31 ॥

दुःख+ भया+ धिशोक

अहो मयात्मा परितापितो वृथा,
सां(ङ्)केत्यवृत्त्यातिविगर्ह्यवार्तया ।
स्त्रैणान्नराद् यार्थतृषोऽनुशोच्यात्,
क्रीतेन वित्तं(म्) रतिमात्मनेच्छती ॥ 32 ॥

सां(ङ्)केत्य+ वृत्त्या+ तिविगर्+ ह्यवार्तया, स्त्रैणान्+ नराद्
यार्थ+ तृषोऽ+ नुशोच्यात् ,रति+ मात्म+ नेच्छती

यद*स्थिभिर्निर्मितवं(म्)शवं(म्)श्य*-
स्थूणं(न्) त्वचा रोमनखै:(फ्) पिन*द्धम् ।
क्षरन्न*वद्वारमगारमेतद्,
वि*ण्मूत्रपूर्णं(म्) मदुपैति कान्या ॥ 33॥

यदस्थिभिर्+ निर्मित+ वं(म्)श+ वं(म्)श्य, पिनद्+ धम्

क्षरन्+ नवद्वा+ रमगा+ रमेतद् ,विण्मूत्र+ पूर्णं(म्)

विदेहानां(म्) पुरे ह्यस्मिन्-नहमेकैव मूढधीः ।
यान्यमिच्छन्त्यसत्यस्मा- दात्मदात् काममच्युतात् ॥ 34॥

यान्य+ मिच्छन्त्य+ सत्यस्मा, का+ ममच्+ युतात्

सुहृत् प्रेष्ठतमो नाथ, आत्मा चायं(म्) शरीरिणाम् ।
तं(वँ) विक्रीयात्मनैवाहं(म्), रमेऽनेन यथा रमा ॥ 35।।

विक्री+ यात्म+ नैवाहं(म्)

कियत् प्रियं(न्) ते व्यभजन्, कामा ये कामदा नराः ।
आद्यन्तवन्तो भार्याया, देवा वा कालविद्रुताः ॥ 36 ॥

आद्यन्+ तवन्तो

नूनं(म्) मे भगवान् प्रीतो, विष्णुः(ख्) केनापि कर्मणा ।
निर्वेदोऽयं(न्) दुराशाया , यन्मे जातः(स्) सुखावहः ॥ 37 ॥

मैवं(म्) स्युर्मन्दभाग्यायाः(ख्), क्लेशा निर्वेदहेतवः ।
येनानुबन्धं(न्) निर्हृत्य , पुरुषः(श्) शममृच्छति ॥ 38॥

स्युर्+ मन्द+ भाग्यायाः(ख्), निर्वेद+ हेतवः, येना+ नुबन्धं(न्)

तेनोपकृतमादाय , शिरसा ग्राम्यसं(ङ्)गताः ।
त्यक्त्वा दुराशाः(श्) शरणं(वँ), व्रजामि तमधीश्वरम् ॥ 39॥

तेनो+ पकृत+ मादाय

सन्तुष्टा श्रद्दधत्येत- द्यथालाभेन जीवती ।
विहराम्यमुनैवाह- मात्मना रमणेन वै ॥40 ॥

श्रद् +दधत्येत, द्यथाला+ भेन, विहराम्य+ मुनै+ वाह

सं(म्)सारकूपे पतितं(वँ), विषयैर्मुषितेक्षणम् ।
ग्रस्तं(ङ्) कालाहिनाऽऽत्मानं(ङ्), कोऽन्यस्त्रातुमधीश्वरः ॥ 41 ॥

विषयैर्+ मुषि+ तेक्षणम् ,काला+ हिनाऽऽत्+ मानं(ङ्), कोऽन्यस्+ त्रातुम+ धीश्वरः

आत्मैव ह्यात्मनो गोप्ता, निर्विद्येत यदाखिलात् ।
अप्रमत्त इदं(म्) पश्येद्, ग्रस्तं(ङ्) कालाहिना जगत् ॥ 42 ॥

निर्+ विद्येत

ब्राह्मण उवाच

एवं(व्ँ) व्यवसितमतिर्- दुराशां(ङ्) कान्ततर्षजाम् ।
छित्त्वोपशममास्थाय, शय्यामुपविवेश सा ॥ 43 ॥

व्यवसि+ तमतिर् ,कान्+ ततर्+ षजाम् , छित्त्वो+ पश+ ममास्थाय
शय्या + मुप+ विवेश

आशा हि परमं(न्) दुःखं(न्), नैराश्यं(म्) परमं(म्) सुखम् ।
यथा सञ्छिद्य कान्ताशां(म्), सुखं(म्) सुष्वाप पिं(ङ्)गला ॥ 44 ॥

इति श्रीमद्भागवते महापुराणे पारमहं(म्)स्यां(म्)
सं(म्)हितायामेकादशस्कन्धेऽष्टमोऽध्यायः।।

ॐ पूर्णमदः(फ्) पूर्णमिदं(म्)पूर्णात्पूर्णमुदच्यते
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥
ॐ शान्तिः(श्)शान्तिः(श्)शान्तिः ॥

